**B.A. (Honours) Examination, 2018**
**Semester-I (CBCS)**
**Sanskrit (Honours)**
**Course : CC-1**
**Classical Sanskrit Literature (Poetry)**

**Time : 3 Hours** **Full Marks : 60**

Questions are of value as indicated in the margin

क-विभागः

1. 'तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः" इत्यत्र 'तदन्वये' पदस्य कोऽर्थः? तत्र कः प्रसूतः? तस्य प्रसूतस्य वर्णनं कालिदासोक्तदिशा सरलसंस्कृतेनोपस्थापयत। 2+1+7=10

अथवा

'न व्यतीयुः प्रजास्तस्य' इत्यत्र 'तस्य' पदेन कः सूचितः? समस्तं श्लोकमुल्लिख्य अन्वयपूर्वकं तात्पर्यार्थं प्रकाशयत। 1+3+3+3=10

2. प्रसङ्गनिर्देशपूर्वकं श्लोकमेकमन्वयमुखेन सुरगिरा व्याख्यात– 5

(क) भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम्।
अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः।।

(ख) प्रजानां विनयाधानाद् रक्षणाद् भरणादपि।
स पिता पितरस्तासां केवलं जन्महेतवः।।

ख-विभागः

3. पार्वती कथं तपस्यायां प्रवृत्ता अभवत्? तस्याः कठोरतरतपस्यायाः वर्णनं कालिदासोक्तदिशा सुरगिरा उपस्थापयत। 2+6=8

अथवा

अधोलिखितेषु द्वयोः भावार्थः संस्कृतेन लिख्यताम्– 4+4=8

(क) क ईप्सितार्थस्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत्।

(ख) पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः।

(ग) वदन्त्यपर्णेति च तां पुराविदः।

4. प्रसङ्गनिर्देशपूर्वकमेकस्य श्लोकस्य संस्कृतेन व्याख्या कार्या– 5

(क) इयेष सा कर्तुमबन्ध्यरूपतां समाधिमास्थाय तपोभिरात्मनः।
अवाप्यते वा कथमन्यथा द्वयं तथाविधं प्रेम पतिश्च तादृशः।।

(ख) कदाचिदासन्नसखीमुखेन सा मनोरथज्ञं पितरं मनस्विनी।
अयाचतारण्यनिवासमात्मनः फलोदयान्ताय तपःसमाधये।।

P.T.O.

5. अधोनिर्दिष्टेषु द्वयोः पदयोः विभक्तिं वचनञ्च निरूपयत–

तपोभिः (in 4 क), प्रेम (in 4 क), आत्मनः (in 4 ख), तपःसमाधये (in 4 ख) 2

अथवा

अधोनिर्दिष्टेषु द्वयोः पदयोः व्युत्पत्तिं निरूपयत–

इयेष (in 4 क), अवाप्यते (in 4 क), अयाचत (in 4 ख), कर्तुम् (in 4 क)

ग-विभागः

6. वनेचरप्रतिपादितं दुर्योधनस्य राजनीतिचातुर्यं वर्णयत सुरगिरा। 8

अथवा

अधोलिखितेषु द्वयोः भावार्थः संस्कृतेन लिख्यताम्– 4+4=8

(क) सदाऽनुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येसु च सर्वसंपदः।

(ख) व्रजन्ति ते मुढधियः पराभवं भवन्ति मायाविषु ये न मायिनः।

(ग) ........ न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः।

7. प्रसङ्गनिर्देशपूर्वकमेकस्य श्लोकस्य संस्कृतेन व्याख्या कार्या– 5

(क) कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपित्सुना।
विभज्य नक्तन्दिवमस्ततन्द्रिणा वितन्यते तेन नयेन पौरुषम्।।

(ख) तदाशु कर्तुं त्वयि जिह्ममुद्यते विधीयतां तत्र विधेयमुत्तरम्।
परप्रणीतानि वचांसि चिन्वतां प्रवृत्तिसाराः खलु मादृशां गिरः।।

8. बङ्गभाषया हिन्दीभाषया आङ्गलभाषया वा कञ्चिदेकमनुवदत– 2

(क) न तेन सज्यं क्वचिदुद्यतं धनुः कृतं न वा कोपविजिह्ममाननम्।
गुणानुरागेण शिरोभिरुह्यते नराधिपैर्माल्यमिवास्य शासनम्।।

(ख) कथाप्रसङ्गेन जनैरुदाहृतादनुस्मृताखण्डलसूनुविक्रमः।
तवाभिधानाद् व्यथते नताननः स दुःसहान्मन्त्रपदादिवोरगः।।

घ-विभागः

9. प्रसङ्गनिर्देशपूर्वकमेकस्य श्लोकस्य संस्कृतेन व्याख्या कार्या– 5

(क) प्रसह्य मणिमुद्धरेन्मकरवक्त्रदंष्ट्रान्तरा–
त्समुद्रमपि सन्तरेत्प्रचलदूर्मिमालाकुलम्।
भुजङ्गमपि कोपितं शिरसि पुष्पवद्धारये–
न्न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत्।।

(ख) हर्तुर्याति न गोचरं किमपि शं पुष्णाति यत् सर्वदा
ह्यर्थिभ्यः प्रतिपाद्यमानमनिशं प्राप्नोति वृद्धिं पराम्।
कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनं
येषां तान् प्रति मानमुज्झत नृपाः कस्तैः सह स्पर्धते।।

10. वङ्गभाषया हिन्दीभाषया आङ्गलभाषया वा कञ्चिदेकमनुवदत– 2

(क) वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह।
न मूर्खजनसम्पर्कः सुरेन्द्रभवनेष्वपि।।

(ख) साहित्यसङ्गीतकलाविहीनः साक्षात् पशुः पुच्छविषाणहीनः।
तृणं न खादन्नपि जीवमानस्तद् भागधेयं परमं पशूनाम्।।

ङ-विभागः

11. खण्डकाव्यस्य लक्षणं किम्? खण्डकाव्य-गीतिकाव्ययोः कः सम्बन्धः? गीतगोविन्दे ऋतुसंहारे वा खण्डकाव्यलक्षणं सुरगिरा संघटयत। 8